Shodhshauryam, International Scientific Refereed Research Journal
Available online at : www.shisrrj.com
OPEN ACCESS
© 2024 SHISRRJ | Volume 7 | Issue 6
ISSN : 2581-6306
doi : https://doi.org/10.32628/SHISRRJ

# शिक्षा-प्रातिशाख्ययोः विशिष्टविषयाणां चिन्तनम्

डॉ. आर्. सुब्रह्मण्य भिडे
व्याख्याता, श्री वेङ्कटेश्वरवेदविश्वविद्यालयः, तिरुपतिः।

**Article Info**

Accepted : 05 Nov 2024
Published : 25 Nov 2024

**Publication Issue :**
November-December -2024
Volume 7, Issue 6

**Page Number :** 18-23

**शोधलेखसारः-** वेदानां षट्सु अङ्गेषु शिक्षा अपि अन्यतमा । अस्यां शिक्षायां वर्ण-स्वर-मात्रा-प्रयत्न-उचारणगति- पूर्वोत्तर-पदसन्धानादि-विषयाः उच्यन्ते । तत्र उच्चारणादिविषये प्रतिवेदं नियमाः भिद्यन्ते । क्वचित् वर्णागमः, क्वचित् वर्णविकारः, क्वचित् उच्चारणभेदः इत्येवं बहवो भेदा भवन्ति । व्यासशिक्षा-तैत्तिरीयप्रातिशाख्यानुसारं हकारोत्तर-अनुनासिकवर्णानाम् उच्चारणविशेषः, शकारपर-नकारस्य उच्चारणविशेषः, क्वचित् अक्षरलोपः, क्वचित् अक्षरासयोगः, अनुदात्तस्वरस्य स्वरितत्वविचारः, इत्येवमादिविचाराः अस्मिन् शोधलेखे प्रस्तूयन्ते ।

**मुख्यशब्दाः-** नासिक्यम् , आगमः, अन्तस्थम् , अनुस्वारः, काठकम् , उदात्तस्वरः, अनुदात्तस्वरः, स्वरितस्वरः।

**पीठिका-** विदितमेव हि भवतां समेषां यत् महर्षिभिः वेदरक्षणार्थं वेदाङ्गानि रचितानीति । तत्र –

**अङ्गानि वेदाश्चत्वारो मीमांसा न्यायविस्तरः।**
**पुराणं धर्मशास्त्रं च विद्या ह्येताश्चतुर्दश ॥**

इति चतुर्दशसु विद्यास्थानेषु शिक्षापि परिगणिता। **'शिक्षा घ्राणं तु वेदस्य'** (पा.शि.15) इति तस्याः महत्त्वमपि परिगणितं वर्तते ।

शिक्षाग्रन्थाः वर्णोच्चारणस्वर-सम्बद्धविधीन् विशेषतो वर्णयन्ति । **'शिक्ष विद्योपादाने'** इति धातोः निष्पन्नः शिक्षाशब्दः। शिक्ष्यन्ते वेदनीयत्वेन उपदिश्यन्ते स्वरवर्णाद्युच्चारणप्रकाराः यत्र सा शिक्षा ।शिक्षाशब्दस्य अङ्कुरः आहोस्वित् मूलं श्रुतावेव प्रथमं निर्दिष्टं भवति । यथा – **शीक्षां व्याख्यास्यामः। वर्णः स्वरः। मात्रा बलम् । साम सन्तानः। इत्युक्तः शीक्षाध्यायः।** (तै.आ.7.1) इति ।

अत्र अकारादयो वर्णाः, उदात्तादयः स्वराः, ह्रस्वदीर्घप्लुता मात्राः, स्पृष्ट-ईषत्स्पृष्टादि-प्रयत्नः बलम् , अतिद्रुतत्वम् अतिविलम्बितत्त्वं परिहाय यथा गुरूपदेशम् उच्चारणलक्षणं साम, पूर्वोत्तरयोः पदयोः सन्धानं, सन्तानः (संहिता) इत्येवं षट् पदार्थाः बीजरूपेण (सूक्ष्मरूपेण) उपदिष्टाः।

श्रुतौ सूक्ष्मरूपेण या शिक्षा उपदिष्टा, सा महर्षिभिः स्थूलरूपेण सविस्तरं प्रतिवेदं प्रतिशाखम् उपदिष्टा वर्तते।

तत्र महर्षिभिः व्यालि-शौनक-याज्ञवल्क्य-वसिष्ठ-कात्यायन-पराशर-माण्डव्य-पाणिनि-गौतम-लोमश-मण्डूक-नारदप्रभृतिभिः विरचिताः शिक्षाः मुख्याः।

**Copyright © 2024 The Author(s):** This is an open-access article distributed under the terms of the Creative Commons Attribution **4.0 International License (CC BY-NC 4.0)**

अत्र प्राय: वेदचतुष्टय-सम्बद्ध-शाखानामपि शिक्षा: विद्यन्ते । अन्या अपि नैका: शिक्षा: लक्ष्मीकान्त-आरण्य-शम्भु-कौहली-व्यास-कौण्डिन्यप्रभृतिभि: विरचिता विलसन्ति ।

एवं च सर्वलक्षणमञ्जरीकारै: व्यासशिक्षाव्याख्यातृभि: ब्रह्मश्री राजधनपाठिभि: कानिचन वचनानि सङ्गृहीतानि प्रदर्शितानि । तानि यथा –

**प्रथमा व्यासशिक्षा च लक्ष्मी शिक्षा द्वितीयिका ।**

**भारद्वाजी तृतीया च शिक्षारण्या तुरीयिका ॥**

**पञ्चमी शम्भुशिक्षा च षष्ठी चाऽऽपिशली तथा ।**

**सप्तमी पाणिनिशिक्षा चाष्टमी कौहली तथा ।**

**वासिष्ठी नवमी चैवं नव शिक्षा: प्रकीर्तिता: ॥** (व्या. शि.भू.पृ.14-15) इति।

एवञ्च यथा अनेका: शाखा: अध्ययन-अध्यापन-परम्परात: लुप्ता:, तथैव बह्व्य: शिक्षा अपि लुप्ता: । तथापि अत्र उपलक्षणार्थं व्यासशिक्षावचनानि कानिचन परामृश्यन्ते । अत्र हकारस्य नासिक्यविधायकवाक्यम् एकं वचनम् एवं स्मर्यते –

**हकारं तत्र नासिक्यमुत्तमोत्तरमेव च ।** (व्या. शि.411) इति।

उत्तमपरं (वर्गपञ्चमाक्षरपरम्) हकारं नासिक्यं भवतीत्यर्थ:। **उदा. मयि गृह्णाम्यग्रे** (तै.सं.5.7.9) **अह्नां केतु:** (तै.सं.2.4.14) **जिह्मं तस्याऽऽघारयेत्** (तै.सं.2.5.11) **इत्यादीनि ।**

अस्मिन्नेवार्थे तैत्तिरीयप्रातिशाख्यवचनमपि एवं वर्तते - **हकारान्नणमपरान्नासिक्यम्** (तै.प्रा.21.14) इति । अत्र हकारात् इति कर्मणि ल्यब्लोपे पञ्चमी । तस्मात् नणामपरं हकारमारुह्य नासिक्यं भवति । सानुनासिक्यो हकार: स्यादित्यर्थ:। अत्र विस्पष्टतायै कौण्डिन्यशिक्षावचनमपि एवं भवति –

**हकारान्नणमा ऊर्ध्वा: पूर्वं तु प्रसरन्ति हात् ।** (कौ.शि.93) इति ।

अर्थात् हकाशत् परे नणमवर्णा: हकारात् पूर्वं प्रसरन्ति इत्यर्थ:।**ब्रह्मविदाप्नोति परम् ।** (तै.उ.2.1) **मह्मा जिनोषि** (तै.सं.2.2.12)। **अपराह्णे ।** इत्यादीनि उदाहरणानि ।

अस्मिन् विषये लोके पण्डितम्मन्या: केचन, तदनुसारिण: केचन लौकिकाश्च हकारस्य नणमपरस्य संयुक्तस्य नासिक्यं भवतीति, अनुनासिका: नणमवर्णा: हकारात् पूर्वं प्रसरन्तीति विषयमज्ञात्वा , ब्रह्,म, अपराह्,ण, सायाह्, न इति अन्यथा उच्चरन्ति , प्रचारं च कुर्वन्ति । तत्र तेषाम् अज्ञानमेव कारणं भवति ।

अपि च हकारस्य नणमपरस्य नासिक्यं भवतीति विशेषमुक्त्वा, विशेषान्तरं च ब्रूते शिक्षा वचनम् । यथा –

**(हकारं तत्र नासिक्यमुत्तमोत्तरमेव च ।)**

**अन्तस्थापरमित्यत्र उरस्यञ्च विदुर्बुधा: ।**

**(विज्ञेया नित्यनासिक्या: यमानुस्वारपञ्चमा:।)**

**अजन्तस्था हकारश्च निमित्तेन तु कीर्तिता: ।(व्या.शि.411-414) इति।**

हकारस्य' 'अकुहविसर्जनीयानां कण्ठ:' इति कण्ठस्थानं भवति । किन्तु स एव हकार: अन्तस्थापरश्चेत् (यरलवा:) उरस्यश्च भवति । उदाहरणं तु – वित्ता ह्येनान् (तै.सं.6.2.7) उत्सं दुह्वते (तै.सं.3.1.10) ह्लादयते, तान् ह्वयति । इत्यादीनि । (तत्पर: किम् ? जुहोतीत्यत्र कण्ठ्यत्वम् ।)

तथा च **नासिक्यानि कानि ?** इत्यंशं वक्ष्यत् शिक्षावचनं **'यमाः, अनुस्वाराः, वर्गपञ्चमाक्षराः, नित्यनासिक्याः भवन्ती'**त्युक्त्वा, **अचः, अन्तस्थाः, हकारश्च, एतेऽपि वर्णाः निमित्तेन (नासिकावर्णसंयोगनिमित्तेन) नासिक्याः सानुनासिकाः भवन्तीति वदति ।** उदाहरणानि – **सुश्लोकाँ 4, संय्यत्ताः, त्रीँल्लोकन् , सँव्वथ्सरः, अह्नां केतुः इत्यादीनि ।** निमित्तेनेति किम् ? यर् हि ।

वयं तु सामान्येन अनुनासिका-अननुनासिकाभेदेन यवला द्विधा इति श्रुणुमः। किन्तु हकारोऽपि अत्र अन्तर्भवतीति शिक्षा-प्रातिशाख्यवचनेन ज्ञायते ।

एवमेव अनुस्वारविषयक-वक्तव्यविशेषः एवं स्मर्यते –

**ज्ञघ्नोत्तरो मकारश्चेदनुस्वारोऽत्र केवलः।**

**द्विमात्र इति विज्ञेयो ह्यन्यधर्मविवर्जितः॥** (व्या शि.166-167) इति ।

अस्यार्थः – (ज्ञ, घ्न, इति शब्दपरः) पदान्तो मकारः 'अनुस्वार' इति विज्ञेयः। एष च अनुस्वारः केवलो विज्ञेयः। केवल इत्यनेन गकारसंयुतत्त्वं निवर्त्यते । अस्य च कियन्मात्रत्वमित्याशङ्कायां 'द्विमात्रो' भवतीत्युच्यते । अन्यधर्माः, गकारसंयुतिः, द्वित्वं, द्वित्वनिमित्तत्वम् इति धर्माः वर्जिता भवन्तीति ज्ञेयम् ।

उदाहरणानि तु – **तमेतया सं (2) ज्ञान्या** (तै.सं.2.2.11)। **रक्षाꣳसि वा इमं (2) घ्नन्ति , न किष्टं (2) घ्नन्ति** (तै.सं.2.1.11) **।** इत्यादीनि । **[**ज्ञ, घ्न, इति आभ्यां किं ? बाहुञ्ज्याया । तं घेदाग्निः। अनेनास्य केवलानुस्खारस्य एकमात्रः उच्यते । यथा – **परमात्मं (1) सरूपम् ।** इति ।**]**

एवञ्च अपरः नकारस्य ञकारादेशरूपो विशेषः एवं सूच्यते –

**काठके तु पृणच्छिद्रं छकारः पूर्वमाप्नुयात् ।**

**शात्तैत्तिरीयके नस्य ञो भवेत्काठके न चेत् ॥** (व्या.शि.349-350) इति।

अयमर्थः – **भद्रं च सह संज्ञानं लोकस्तुभ्यमिति क्रमात् ।**

**एते काठकसंज्ञाः स्युः पञ्च प्रश्ना न चेतरे ॥**

इति आरण्यशिक्षा । भद्रं, सह वै, संज्ञानं, लोकोऽसि , तुभ्यं, एतेषु पञ्चप्रश्नेषु **'पृण च्छिद्रं'** इत्यत्र छकारः पूर्वागमं प्राप्नोति । **'लोकं पृण च्छिद्रं पृण'** (तै.आ.1.25) इत्युदाहरणम् । काठकादन्यत्र - **लोकं पृण छिद्रं पृणाथो सीद शिवा त्वम्** (तै.सं.4.2.4) इति । अत्र छकारः पूर्वागमं न प्राप्नोति ।

तथैव एषु काठकसंज्ञाव्यतिरिक्तस्थले शकारात्परस्य नकारस्य ञकारादेशो भवति । उदाहरणानि तु – **नवतिं च श्ञथिष्टम्** (तै.सं.3.2.11)। **यत्प्राश्ञीयात्** (तै.ब्रा.1.3.10)। **शादिति किं ? अस्ना रक्षः** (तै.ब्रा.3.6.6)। **नस्येति किं ? अश्मन्नूर्जम्** (तै.सं.4.6.1)। **काठके न चेदिति किं ? ब्रह्मचारिणे प्रश्नान्** (तै.ब्रा.3.10.9)। **रात्रिमाश्ना इति** (तै.ब्रा.3.11.8)। **अश्नुते तं कामम्** (तै.ब्रा.3.12.5)। **अन्नमश्नीत मृज्मीत** (तै.आ.1.4)। इत्यादीनि ।

एबमेव आगमविशेषाः केचन एवं स्मर्यन्ते –

**आगमस्त्रपुपूर्वः स्यान्मिथ्वधः शोऽपि चोत्तरः॥**

**सुपूर्वश्शोऽपि चन्द्रोर्ध्वः सम्पूर्वः सः कुरूत्तरः॥**

**समपूर्वश्च कुर्वोर्ध्वः नीचापूर्वो द उच्परः॥** (व्या.शि.146-148) इति।

अयं भाव: – त्रपु–मिथु–पूर्व:, चकारपर:, शकार: आगमो भवति । **त्रपुश्च मे** (तै.सं.4.7.5)। **मिथुश्चरन्तम्** (तै.सं.4.7.15)। प्रत्युदाहरणं तु – **विभु च मे** (तै.सं.4.7.4) **असिना मिथू क:**(तै.सं.4.6.9)। इति ।

तथैव – **सुपूर्व: चन्द्रवर: शकार आगमो भवति। उदाहरणं तु - सुश्चन्द्र दस्म विश्पते** (तै.सं.4.4.4)। इति [ तत्पूर्व इति किं ? प्र चन्द्रमा:(तै.सं.2.4.14)। तत्पर इति किं ? सुचरिते भज(तै.सं.1.1.12) ।]

एवं सं पूर्व: कुरु–पर: सकार: आगमो भवति । उदाहरणं – **यजमानस्सꣳस्कुरुते** (तै.सं.5.6.6)। [प्रत्युदाहरणं तु – **देवलक्ष्ममेव तत्कुरुते ।** तत्पर इति किं ? **'यत्संकृत्यच्छावाकसामम्"** (तै.सं.5.4.12)इति।]

एवञ्च – समपूर्व: कुर्वपर: सकार आगमो भवति । उदाहरणं – **त इषुꣳ समस्कुर्वत** (तै.सं.6.2.3)। प्रत्युदाहरणं – **अग्निहोत्रं व्रतमकुर्वत** (तै.सं.3.2.2)। इति।

तथैव – नीचापूर्व: उच्चापर: दकार: आगमो भवति । उदाहरणं – **मध्यान्नीचादुच्चा** (तै.सं.2.3.14)। प्रत्युदाहरणं – **नीचा तं धक्षि** (तै.सं.1.2.14)। इति।

एवमेव लोपविषयक–शिक्षावचनमेकमत्र उदाहियते । यथा –

**एनौषधीरिद्विदग्न इमान्न: परतश्च स: ।**(व्या.शि.151) इति।

अयं भाव: – एना, औषधी:, इदु, इदग्ने, इमान्न: इत्येवं पर: स: इत्यत्र विसर्जनीयो लुप्यते । [सन्धिश्च भवति ।] उदाहरणानि – **सैनानीकेन** (तै.सं.4.3.13)। **सौषधीरनु** (तै.सं.4.2.3)। **सेदु होता** (तै.सं.1.1.14)। **सेदग्ने अस्तु** (तै.सं.1.2.14)। इत्यादीनि । [प्रत्युदाहरणानि – स इञ्जनेन । स इमामभ्यमृशत् । स इति किं ? परो दिवा पर एना । इत्यादीनि ।]

एवञ्च – अत्र उपलक्षणार्थं केषुचन विषयेषु नाना शिक्षावचनानि परामृष्टानि । एताभि: शिक्षाभि: सह , शिक्षाशास्त्रसम्बद्धत्वात् प्रातिशाख्यमपि शिक्षाशास्त्रे अन्तर्हितं भवति। शिक्षा यथा अनेका रचिता: तथैव प्रातिशाख्यान्यपि महर्षिभि: रचितानि । शाखां शाखां प्रति, प्रतिशाखम्, प्रतिशाखं भवं प्रातिशाख्यम् , इति हिं कारणात् , तत्तद्वेदशाखानाम् उच्चारणारीति–नियमविशेषान् अधिकृत्य तत्तत्प्रातिशाख्यानि रचितानि । तत्र उपलक्षणरूपेण तैत्तिरीय–प्रातिशाख्यस्य केचन विचारा: अत्र परामृश्यन्ते । तत्र लोपविषये – **ईम् पूर्वो मकार:। तुनुपूर्व उदात्तयोर्वकार: । उत्पूर्वस्सकारो व्यञ्जनपर:।** (तै.प्रा.5.12–14) इत्यादीनि सूत्राणि ।

अयं भाव: – ईं पूर्व: मकार: लुप्यते । उदाहरणं - **ईमन्द्रासु प्रयस:**(तै.सं.4.1.8)।

तुनु पूर्वयो: उदात्तयो: पूर्वयो: पदयो: परत: स्थित: वकार: लुप्यते। यथा – **स त्वै दर्शपूर्णमासौ यजेत** (तै.सं.2.5.4)। **मनुष्यायेन्वै** (तै.सं.1.5.9)। [ प्रत्युदाहरणं – मा वस्तेन ईशत । प्र तु जनयतीति । अनु वृत्रहत्ये । विदुषो नु यज्ञम् ।]

तथैव, उत् पूर्व:, व्यञ्जनपर: सकार: लुप्यते । उदाहरणं – **ज्योतिषा दिवमुत्तभान** (तै.सं.4.6.5) **। उत्थास्यते स्वाहा** (तै.सं.7.1.19)। [ उत्पूर्व इति किं ? जगत्स्था देवा: । सकार इति किं ? उत्क्रꣳस्यते स्वाहा । व्यञ्जनपर इति किं ? देवस्त्वा सवितोत्सृजतु । इत्यादीनि प्रत्युदाहरणानि।]

एवमेव स्वरविषये – **उदात्तात्परोऽनुदात्त: स्वरितम् । व्यञ्जनान्तर्हितोऽपि । नोदात्त-स्वरितपर:।** (तै.प्रा.14.29–31) इत्यादीनि।

अस्यार्थः – उदात्तगुणात् स्वरात् परतः स्थितः अनुदात्तगुणः स्वरः स्वरितगुणमश्नुते – **अनमीवा अयक्ष्मा**:(तै.सं.1.1.1)। **स इधानः** (तै.सं.4.4.4)। व्यञ्जनव्यवहितोऽपि स्वरितमापद्यते । **तदग्ने अनृणः**(तै.सं.3.3.8)। **यस्त्वा हृदा**(तै.सं.1.4.46) इत्यादीनि । किन्तु उदात्तपरः स्वरितपरो वा उदात्तात् परः अनुदात्तः व्यञ्जनव्यवहितोऽपि स्वरितं नापद्यते । यथा – **स इमं लोकम्** (तै.सं.1.5.9)। **स उक्थेन रुद्रान्** (तै.सं.7.1.5)। **ध्रुवा अस्मिन्** (तै.सं.1.1.1) । **तास्सृष्टाः क्षुधं न्यायन्** (तै.सं.7.2.4.)। **यच्छूद्रे यदर्ये** (तै.सं.1.8.3)। [ उदात्तस्वरितपर इति किं ? सून्नीयमिव । अथैता आहुतीः। पौर्णमासीं चोक्थ्यं च । इति। अयं प्रतिषेधनियमः 'अनन्तरस्य भवति विधिर्वा प्रतिषेधो वा' इति न्यायात्, क्षैप्र–निहत–प्रश्लिष्ट–अभिनिहतानां नान्वेति।]

एवञ्च स्वरितविशेषानधिकृत्य – **इवर्णोकारयोर्यवकारभावे क्षैप्र उदात्तयोः।** (तै.प्रा.20.1) इत्यारभ्य, क्षैप्रस्वरितम् , नित्यस्वरितम् , प्रातिहतस्वरितम् , अभिनिहतस्वरितम् , प्रश्लिष्टस्वरितम् , पादवृत्तस्वरितम् , तैरोव्यञ्जनस्वरितम् इत्येवं सप्त स्वरितविशेषाः उक्ताः।

तथा च कुत्र लोपः भवतीत्यत्र द्वादशाध्याये – **अथ लोपः। असि । न गर्भस्सन्नद्धो यमो भद्रः पूर्वः। यवनहपरः स्वरपरेषु । जकार-ग्नपर उदात्तः।**(तै.प्रा.12.1–5) इत्यादिभिः बहुभिः सूत्रैः लोपविचारः विस्तरेण कथितः।

एबमेव – कुत्र अलोपः भवतीत्यत्र – **अथ अलोपः। धातारातिरुप-वाजपेय-जुष्ट** ... (तै.प्रा.11.2–3) इत्यादिभिर्बहुभिस्सूत्रैः अलोपप्रकरणं च उक्तम् । एवञ्च – **रेफभावः**, (तै.प्रा.8.8) **षत्वभावः**, (तै.प्रा.8.8) **सत्वभावः**, (तै.प्रा.8.25) **सत्वनिषेधः**, (तै.प्रा.8.26) तथैव – **इङ्ग्य** - (तै.प्रा.1.48) **अवग्रह** - (तै.प्रा.1.49) **अपृक्त** - (तै.प्रा.1.54) इत्यादिसंज्ञाः, **शब्दोत्पत्तिप्रकारः** (तै.प्रा.2.1) एवं बहून् अंशानधिकृत्य तैत्तिरीयप्रातिशाख्ये चतुर्विंशेषु अध्यायेषु प्रपञ्चितं वर्तते ।

एवञ्च अस्मिन् शोधलेखे, **व्यासशिक्षायां हकारस्य निमित्तेन नासिकत्वविचारः, केवलानुस्वारविषयकविशेषः, नकारस्य ञकारादेशविचारः, आगमविशेषाः, लोपविषयक-विशेषाः, तैत्तिरीयप्रातिशाख्ये च केचन लोपविषयकविशेषाः, स्वरविचारः, सप्तस्वरितभेद-विचारः, 'असि' इत्यादिपदानां लोपाऽलोपविचारः, रेफ-षत्व-सत्व-विचारः इत्येवं दिङ्मात्रेण परामृष्टम् ।**

यद्यपि वेदविद्यायाः शिक्षणे गुरुपरम्परया गुरुच्चारणमनुच्चारणपद्धतिरस्ति चेदपि, विविधविषयेषु सन्देहनिवृत्त्यर्थं , 'इदमित्थम्' इति निर्णयात्मिकबुद्धिसिद्ध्यर्थं , बहुषु अध्ययन–सम्बद्धविषयेषु अधिकृतत्वप्राप्त्यर्थ, विविधप्रदेशस्थित–वेदपाठकानां देशकालनिमित्तेन पुरुषबुद्धि–निमित्तेन च सम्भूत–सम्भूयमान–सम्भविष्यमाण–दोषनिवृत्त्यर्थं, वैमत्यनिरासद्वारा सम्यग्ज्ञानप्रापणार्थं च, शिक्षाशास्त्रम् अतीव आवश्यकं सत् , 'शिक्षाशास्त्रं विना वेदरक्षणं न भवती'त्युक्तौ न कापि अतिशयोक्तिरस्तीति, शिक्षाशास्त्रप्रणयनेन अस्मत्पूर्वजाः महर्षयः लोकानां महान्तमुपकारम् अकार्षुः, तद्द्वारा वेदाख्यं ज्ञानदं ग्रन्थं यथापरम्परां यथासम्प्रदायं वा अरक्षन्निति, 'षडङ्गानां मध्ये शिक्षाशास्त्रस्य महत्वम् अनितरसाधारणं च भवती'त्युक्त्वा विरम्यते विस्तरादिति शम् ।

**परामृष्टग्रन्थाः**

1. Vyaasa Shikshaa, Editor : P N Pattabhirama Shastri, Print – 1976, Pub. Veda, Mimamsa Research Center , 4 / 7, Hanuman Ghat, Varanasi

2. Taittiriya Pratishakhyam, Editor : R.Shama Shastri, K. Rangacharya, Reprint : 1985, Pub.Motilal banarasidas, Bungalow Road, Javahar nagar, Delhi - 110007
3. Koundnya Shiksha, Commentary : Dr. V S Ghanapathi, Print : 2016, Pub : Sri S G Veda Pathashala, Veda Bhavan, #58-59,Road no.1,Chandragiri colony, Secunderabad-56
4. Taittiriya Samhita, Editor : Sreepada Damodar Satvalekar, Pub. Svadhyaya Mandal, Paradi , Balasad, Gujarat State
5. Taittiriya Aranyakam, With Sayana Bhashyam Vol. 1-2, Editor : Baba shastri Phadke, Reprint : 2000, Pub. Anandashrama samstha,Pune , Maharashtra State
6. Taittiriya Brahmanam, Pub. Gomatham Srinivasa Josyar &Sons, No.712, Tyagaraja Road, K R Mohalla, Mysore - 570024